अन्वय - **(हे नामधारक) परां रुचिरां कथां शृणु। सुभाविकः कुविन्दकः सः तन्तुकः प्रभुभजकः आस। तं बन्धुता श्र्यगगमनाय आव्हयत्। सः तां जगौ। इह मे अर्च्यदेवता (एव) अगः (अस्ति)।**

अर्थः - हे नामधारका, अतिशय सुंदर कथा ऐक. अतिशय गुरुभक्तिमान् कोष्टी जातीचा तंतुक भगवत्सेवक होता. त्या तंतुकाला त्याच्या बंधुसमूहानें श्रीशैल्याला जाण्याकरितां हांक मारली. तो तंतुक त्या बंधूंना म्हणाला :येथें माझी उपास्य देवता भगवानच श्रीशैल्य आहे.।। रुचिरावृत्तम्।।४९।।

मत्वाऽज्ञं तं सा तु जगामाऽगमथोचेमध्याह्ने तं संगममाप्तं स तु नो चेत्।।

दृष्टोऽगोऽन्वेहीत्यनयत्तं स च दृष्ट्वानृत्यन्रेजे मत्तमयूरोपम इष्ट्वा।।५०।।

अन्वय - **सा तु तं अज्ञं मत्वा अगं जगाम। अथ मध्यान्हे संगमं आप्तं तं ऊचे। अगः त्वया न दृष्टश्चेत् त्वं अन्वेहि। इति तं अनयत् स तं दृष्ट्वा इष्ट्वा च नृत्यन् मत्तमयूरोपमः रेजे।**

अर्थ - बंधूसमूहानी तसे बोलणाऱ्या तंतुकाला अज्ञ समजून श्रीशैल्याला प्रयाण केले. त्यानंतर शिवरात्री व्रताच्या दिवशी मध्यान्हाच्या वेळी संगमाला आलेल्या तंतुकाला भगवान् बोललेः- श्रीशैल्य तुझ्याकडून पाहिला नसेल तर, तंतुका, माझ्या पाठीमागून ये. असें बोलून आकाशगमन सिद्धीने क्षणांत श्रीशैल्याला भगवानांनीं त्याला नेले. तंतुकाने श्रीशैल्य मल्लिकार्जुन पाहून पूजा करून मत्त हर्षाने मयूरासारखें वर्तन केले.।। मत्तमयूरम्।।५०।।

कृत्वा वपनं द्रष्टुं गुरुणाऽऽदिष्टः स मल्लिकार्जुनं गत्वा।

तत्र गुरूंस्वजनानपि दृष्ट्वैत्य पुनर्जगौ गुरुं नत्वा।।५१।।

अन्वय - **गुरुणा आदिष्टः वपनं कृत्वा मल्लिकार्जुनं द्रष्टुं गत्वा तत्र गुरुन् स्वजनान् अपि दृष्ट्वा पुनः गुरुं एत्य जगौ।**

अर्थ - भववंतांनी आज्ञा दिलेला तंतुक वपन व स्नान करून मल्लिकार्जुनाला पाहण्याकरितां जाऊन त्या देवस्थानांत गुरुमाउलीला आणि देवालयांत आपल्या स्वजनबंधू इत्यादिकांना पाहून पुनः गुरुजवळ जे पाहिले होते ते सांगता झाला.।। आर्या।।५१।।

अवेक्ष्याप्यन्तिकस्थं त्वामुपेक्ष्यापि कुतो जनः।

दूरमेतीति संपृष्टो दूरदृष्टिरुवाच तम्।।५२।।

अन्वय - **अन्तिकरस्थं त्वां अवेक्ष्य जनः दूरं कुतः एति इति पृष्टः दूरदृष्टिः तं उवाच।**

अर्थ - जवळ असलेल्या तुला भगवंताला पाहूनहि, देवा, पुनः उपेक्षा करून लोक काय हेतूने येथे दूर येतात? असा (प्रश्न)विचारलेला दूरदृष्टीचा भगवान् त्या तंतुकाला बोलला.।। अनुष्टुप्।।५२।।

कारुण्यात्स्वेच्छया मे जननमिह कृतं कर्म दिव्यं च तज्ज्ञा

गौण्या भक्त्या पवित्राः स्मृतिकथनमुखैश्चार्चनैर्नापराधैः।।

पादोदाद्यैर्मदात्मा विदित इह तु यैर्भक्तिमाप्ताः परां ये

संमानाद्यङ्कितास्तत्कृतवसतिषु मे नित्यवासो विभोश्च।।५३।।

अन्वय - **मे कारुण्यात् स्वेच्छया इह जननं कृतं दिव्यं कर्म च कृतं तज्ज्ञाः, स्मृतिकथनमुखैः नापराधैः अर्चनैः गौण्या भक्त्या पवित्राः यैः मदात्मा विदितः ये परां भक्तिं आप्ताः संमानाद्यंकिताः तत्कृतवसतिषु मे विभोः नित्यवासः अस्ति।**

अर्थ - माझ्याकडून या लोकांमध्ये, लोकांच्या वरील करुणेने अवतार धारण केला गेला आहे. आणि दिव्य वर्णाश्रमाचारविहित कर्महि केलेले आहे. याविषयीं जे तज्ञ माझा अवतार व कर्म जाणणारे शास्त्रानुसारी शुद्ध पूजनादिकांच्या योगानें व चरणतीर्थसेवनानें गौणी भक्ति करून पवित्र झालेले नंतर ज्यांच्याकडून मत्स्वरूप ज्ञात झाले, जे पराभक्तीला प्राप्त झाले, माझ्या सम्मानतेला प्राप्त झालेले जे आहेत त्यांच्या कृतीमध्ये, वसतीमध्ये माझें नित्य वास्तव्य असते.।। स्रग्धरा।।५३।।

इत्युक्त्वा कथयित्वाऽस्मै विमर्षणकथां पुनः।

सुमर्षणो धारयित्वा पादुके मठमानयत्।।५४।।

अन्वय - **सुमर्षण इति उक्त्वा पुनः अस्मै विमर्षणकथां कथयित्वा पादुके धारयित्वा मठं आनयत्।**

अर्थ - नित्य शांत भगवान् असे बोलून त्या तंतुकाला विमर्षण राजाची कथा सांगून पुनः पादुका धरण्यास सांगून त्याला पुनः मठाकडे आणता झाला.।।अनुष्टुप्।।५४।।

जनाय पृच्छते क्षौरहेतुं तन्तुक आह सत्।

असन्मेने स पक्षान्ते सदासाऽऽप्तात्तु तैर्थिकात्।।५५।।

अन्वय - **क्षौरहेतु पृच्छते जनाय तन्तुकः सत् आह। स असत् मेने। पक्षान्ते तैर्थिकात् आप्तात् तु सत् आस ।**

अर्थः - क्षौर केल्याचे कारण विचारणाऱ्या लोकांना तंतुकाने खरी गोष्ट सांगितली. ते ऐकूनहि ते लोक खोटे समजते झाले. पुढे १५ दिवसांनंतर श्रीशैल्याहून आलेल्या लोकांकडून ऐकल्यानंतर सत्य असे त्यांना वाटले.।।अनुष्टुप्।।५५।।

दूरीकृत्यान्तरं साक्षादुरीकृत्याङ्ग तन्तुकः।

परा भक्तिं ययौ साक्षात्परां भागवतीं गतिम्।।५६।।

अन्वय - **अन्तरं दूरीकृत्य अङ्ग, परां भक्तिं उरीकृत्य तन्तुकः परां भागवतीं गतिं ययौ।**

अर्थ - हे नामधारका, अविद्या माया उपाधिगत भेदाला तंतुकाने दूर करून साक्षात् पराभक्तीचा स्वीकार करून पराकाष्ठात्मक असलेल्या भगवद्गतीला (मोक्षाला) प्राप्त झाला.।।अनुष्टुप्।।५६।।

नन्दिशर्माऽभजद्देवीं कुष्ठान्ताय तया यतिम्।

गन्धर्वस्थं चरेत्युक्तः स्वप्ने बुद्धोऽवदत्स ताम्।।५७।।

अन्वय - **नन्दिशर्मा कुष्ठान्ताय देवीं अभजत्। तया गंधर्वस्थं यतिं चर इति स्वप्ने उक्तः स बुद्धः तां अवदत्।**

अर्थ - कुष्ठी अशा नंदीशर्मा ब्राह्मणाने कुष्ठनाशाकरितां (देवीचंदलापरमेश्वरीची) सेवा केली. त्या देवीकडूनहि-तूं गाणगापुरींत राहणाऱ्या यतींच्याजवळ जा याप्रमाणे स्वप्नामध्यें सांगितलेला असा तो, जागा होऊन त्या देवीला बोलला (देवीसह साक्षात् भाषणाचा अभाव असला तरी देवीप्रतिमेसन्निध बोलणे शक्य आहे.)।।अनुष्टुप्।।५७।।

वृषाकपाय्योर्नो भेदो वृषाकप्योर्मनागपि।

संमतो देवदैवज्ञे विमतोऽमर्त्यमर्त्ययोः।।५८।।

अन्वय - **वृषाकपाय्योः भेदः न संमतः वृषाकप्योः मनाक् अपि भेदः न संमतः हे देवदैवज्ञे अमर्त्यमर्त्ययोः भेदः विमतः न किन्तु मतः एव।**

अर्थः - गौरी आणि लक्ष्मी एकरूप असलेमुळे यांच्यांत भेद नाहीं. आणि शिव व विष्णु यांच्यांतहि भेद संमत नाही. हे देवांचे दैव जाणणारे देवी, देव आणि माणूस यांच्यांत मात्र परस्पर विरुद्ध असलेमुळे भेद मानावाच लागतो.।।अनुष्टुप्।।५८।।

नरं चरेति कथितुं देवि लज्जाऽपि ते न किम्।

तेन किं मम चात्रैव कुर्वे प्रायोपवेशनम्।।५९।।

अन्वय - **नरं चर इति कथितुं देवि ते लज्जा न किं मम तेन किं प्रयोजनं अत्रैव प्रायोपवेशनं कुर्वे।**

अर्थ - तूं मनुष्याजवळ जा-याप्रमाणे सांगतेस-असे सांगण्यास हे देवी, तुला लज्जाहि वाटत नाही काय ? त्या मनुष्याशी माझे काय प्रयोजन आहे ? म्हणून येथें प्रायोपवेशन सुरू करतो.।।अनुष्टुप्।।५९।।

ततोऽसौ हापितो यातो यतिं तेनोदितोऽपि ते।

कृत्यं मर्त्येन किमिति स तदा वेद तं परम्।।६०।।

अन्वय - **ततः असौ हापितः यतिं यातः तेन अपि मर्त्येन ते किं कृत्यं इति उदितः स तदा तं परं वेद।**

अर्थ - त्यानंतर देवीकडून आपल्या भक्ताच्या द्वारां घालवला गेलेला हा ब्राह्मण गुरुमाउली भगवंताकडे गेला. तेथे त्या भगवंताकडूनहि मानव अशा माझ्याकडून तुझे कार्य काय होणार असे बोललेला तो नंदी ब्राह्मण तेव्हां त्या भगवंताला बुद्धिसाक्षी परमेश्वर असे समजता झाला.।।अनुष्टुप्।।६०।।

संगमे स्नापयित्वा स आनीतो गुरुणाऽन्तिकम्।

एकं प्रतीकं कुष्ठाक्तं दृष्ट्वाऽभाणीत्स तं हितम्।।६१।।

अन्वय - **ततः गुरुणा संगमे स्नापयित्वा अन्तिकं आनितः सः एकं प्रतीकं कुष्ठाक्तं दृष्ट्वा हितं तं अभाणीत्।**

अर्थ - त्यानंतर गुरूंकडून संगमावर स्नान घालून जवळ आणलेला तो नंदीशर्मा ब्राह्मण एक कुष्ठयुक्त अवयव पाहून हितकारक अशा त्या भगवंताला म्हणाला.।।अनुष्टुप्।।६१।।

कुष्ठं शिष्टमिदं कुतो वद हरे मत्संशयाच्चेत्सुधा

पीताऽप्यम्बुधिया मृतिं नयति किं स्पृष्टोऽनलोऽज्ञानतः।।

किंवाऽल्पं दहतीत्यजोऽवददमुं जन्मान्धबुद्ध्या यथा

भात्यर्कोऽपि तमोमयो मयि तथा त्वत्कल्पनेयं वृथा।।६२।।

अन्वय - **हरे ! इदं कुष्ठं कुतः शिष्टं मत्संशयात् अवशिष्टं इति चेत् अम्बुधिया अपि पीता सुधा मृतिं नयति किम् ? वा अज्ञानतः स्पृष्टः अनलः अल्पं दहति किं ? इति श्रुत्वा अजः अमुं अवदत्। यथा जन्मान्धबुद्ध्या अर्कः तमोमयः भाति, तथा मयि इयं त्वत्कल्पना वृथा।**

अर्थ - हे हरे, हे कुष्ठ काय कारणांस्तव शिल्लक राहिले ते सांगा- हा मनुष्य आहे कीं देव आहे या माझ्या संशयाने हे कुष्ठ राहिले आहे, असे जर आपण म्हणाला तर- पाण्याच्या बुद्धीने प्यालेले अमृत मरण देईल काय ? अथवा अज्ञानाने स्पर्श केलेला अग्नी थोडा जाळतो काय ? असा विचारलेला भगवान् त्या नंदीशर्माला बोलला :- ज्याप्रमाणे जन्मांधाच्या बुद्धीने सूर्य तमोमय भासतो, त्याप्रमाणे मजविषयीं व्यर्थ ही तुझी कल्पना आहे. तुझा दोष हाच.।। शार्दूलविक्रीडितम्।।६२।।

विप्राऽथाऽपि स्तुहि परधिया मां तया तेऽस्तु शुद्धिस्
तद्धि श्रुत्वाऽवददयमहो विद्धि मां हीनबुद्धिम्।।
मौने जाने न च लिपिमपीत्यत्रिजो भस्म दिव्यं
तज्जिह्वाग्रेऽक्षिपदथ कविः सोऽपि भूत्वेशमस्तौत्।।६३।।

अन्वय - **विप्र ! अथापि परः इति धिया मां स्तुहि तया ते शुद्धिरस्तु तद्धि श्रुत्वा अयं अवदत्। अहो मौने ! मां हीनबुद्धिं विद्धि। लिपिं अपि न जाने इति अत्रिजः दिव्यं भस्म तज्जिह्वाग्रे अक्षिपत्। अथ सः अपि कविः भूत्वा ईशं अस्तौत्।**

अर्थ - हे ब्राह्मणा, तथापि हा परमात्मा आहे या बुद्धीने माझी स्तुति कर. त्या स्तुतीने तुझी शुद्धि होईल. ते बोलणे ऐकून ब्राह्मण म्हणाला : हे यतिवर्य, मी अत्यंत हीन बुद्धीचा आहे. मला लिपीचे सुद्धां ज्ञान नाही. असे त्याचे म्हणणे ऐकून भगवानानें दिव्य अभिमंत्रित भस्म त्याच्या जिव्हेवर टाकले. त्यानंतर तो ब्राह्मण कवि होऊन भगवंताची स्तुति करता झाला.।। मन्दाक्रान्ता।।६३।।

ब्रह्मन् तत्त्वमसि त्वमादिपुरुषः सन्निर्विशेषोऽकलः
कालादीन्निजशक्तितः सृजति यः सोऽचिन्त्यशक्तिः स्वराट्।।
पञ्चाग्निक्रमतोंऽशकान्कृतफलप्राप्त्यै मुहुर्भ्रामयन्
गर्भावासजनुर्दशादिभिरहंत्वेनापि नो लिप्यते।।६४।।

अन्वय - **ब्रह्मन् ! त्वं तत्त्वमसि त्वं निर्विशेषः अकलः आदिपुरुषः सन् निजशक्तितः कालादीन्सृजति। यः सः अचिन्त्यशक्तिः स्वराट् अंशकान् पंचाग्निक्रमतः गर्भावासजनुर्दशादिभिः भ्रामयन् अपि अहंत्वेन नो लिप्यसे।**

अर्थ - हे ब्रह्मन्- आपण परब्रह्मरूप आहांत, तूं निर्विशेष म्हणून षोडशकलारहित आहेस. आदिपुरुष असून आपल्या मायेच्या संबंधाने कालादिकांना निर्माण करतोस. जो या तऱ्हेचा स्त्रष्टा तो तूं अचिंत्य, सत्त्वासत्त्वाहून अनिर्वचनीय अशा मायाशक्तीने संपन्न स्वतःसिद्ध ज्ञानवान्, अंशभूत जीवांना त्यांनीं केलेल्या कर्माच्या फलप्राप्तीकरितां अंतरिक्ष, पर्जन्य, औषधी, पुरुष आणि स्त्री या पंचाग्नींच्या क्रमाने गर्भवास जन्मादिक अवस्थांप्रत फिरवीत असतांनाहि मी सर्वांचा कर्ता आहें या अभिमानाने तूं लिप्त होत नाहीस.।। शार्दूलविक्रीडितम्।।६४।।

निवर्तते ज्ञानमृते त्वनादिभ्रमो न न त्वद्भजनं विना तत्।।
अतस्त्वयि प्रीतिरनारताऽस्तु यथाऽबुधानां विषयेषु नाथ।।६५।।

अन्वय - **अनादिभ्रमः ज्ञानं ऋते न निवर्तते त्वद्भजनं विना तत् न नाथ ? यथा अबुधानां विषयेषु प्रीतिः तथा त्वयि अनारता प्रीतिः अस्तु।**

अर्थ - हा अनादिभ्रम आत्मज्ञानावांचून दूर होत नाहीं. भ्रमनिवृत्तीकरितां ज्ञानच आवश्यक आहे, ते ज्ञान तर तुझ्या भक्तीशिवाय प्राप्त होत नाही. म्हणून हे नाथा, मूर्खांची ज्याप्रमाणे विषयांच्या ठिकाणी सतत प्रीती असते, तशी त्वद्विषयी सतत माझी भक्ती असूं दे.।।। उपजातिः।।६५।।

एकस्त्वं षड्रिपून् जेतुं भगवन्न क्षमोऽसि चेत्।।

जह्येकं काममेवाथो शिष्टा यास्यन्ति पञ्चताम्।।६६।।

अन्वय - **भगवन् एकः त्वं षड्रिपून् जेतुं न क्षमः असि चेत् एकं कामं एव जहि। अथो शिष्टाः पंचतां यास्यन्ति।**

अर्थ - देवा, कामादि षड्रिपूंनी व्याप्त चित्ताच्या लोकांची माझ्या विषयी कुठून सतत प्रीती होईल? असे म्हणशील तर त्यांना नाहींसे करून प्रीती दे. जरी साही शत्रूंना मारण्यांत प्रयास आहे असे म्हणाल तर, भगवन्, एकटा तूं षड्रिपूंना जिंकण्यास समर्थ नसशील तर एका कामालाच नाहीसा कर. त्यानंतर कामघातानंतर बाकीचे पांच शत्रु आपोआपच नष्ट होतील. बाकीचे पांचहि कामोद्भव आहेत.।। अनुष्टुप्।।६६।।

तौतातितातीत तात ततनन्तुततीत ते।

तत्ता तूता तता तेऽन्तातीतताऽतितता ततः।।६७।।

अन्वय - **हे तौतातित (हे) तात (हे) ततन्तुततीत ते तता तत्ता तु उत अस्ति (यत एवं) ततः अतितता ते अन्तातीतता अस्ति पक्षे (हे, तौतातितातीत (हे) तात (हे) ततन्तुततीत। तता ते तत्ता उत अस्ति हे ततः अतीत अतीतता ते अन्तातीतता चास्ति।।**

अर्थः - क्षपणक सौगत अशा बौद्ध अवांतर मतरहित अशा तेज, पाणी, अन्नादिलक्षण प्रकृत्यादि द्वारां जगत्विस्तारका, हे विस्तृत अशा प्रकृतिविकृतिलक्षण भूतभौतिकरूप पंक्तींना सोडून त्याहूनहि अधिक रूपांत असलेल्या हे भगवन्, तुझी सर्वत्र व्याप्ती ब्रह्मभावानें आहे. स्वकार्यसहित प्रधानतत्त्वाच्यापलीकडे असलेल्या ब्रह्मरूप भगवन्, तुझा ब्रह्मभाव सर्व प्रधानादिकांच्या ठिकाणीं अनुस्यूत आहे. म्हणून सर्वत्र व्याप्त असल्यानें अतिशयानें असणारी तुझी व्याप्ती देशकालवस्तुविभागातीत अशी आहे.।। एकाक्षरी।।६७।।

सरसासारसंसार सुरासारारिसारर।

सूरिसूरेऽसुरारे रैरसारेरं रसोऽसि सः।।६८।।

अन्वय - **(हे) सरस असारसंसार सुरासारारिसारर सूरिसूरे असुरारे रैरसारे (त्वं) अरं सः रसः (असि)।**

अर्थ - या प्रकारच्या स्तुतीने प्रोत्साहित नंदिशर्मा ब्राह्मण सद्गुरूंची स्तुति करूं लागला. विक्षेप, आवरणरहित अशा विशुद्ध सत्त्वउपाधींमुळे अनुभवाला येणारा जो नित्य, निरतिशय, निरुपाधिक, आनंद त्याने सहित अशा हे परमानंदा, हा असार संसार ज्याच्यामुळे आहे अशा संसारबीजा, संसारांत असणारा सारभूत आनंद तोहि तुझ्याच अस्तित्वाने भासणारा आहे. इंद्रिय अंतःकरणाने सहित असलेल्यांचे निर्बल असे जे रागादि शत्रू त्यांचे बल हरण करणाऱ्या म्हणजे आपल्या भक्तांच्या इंद्रियादि दुर्वृत्तींच्या सामर्थ्याला नाहीसा करणारा आहेस. शिवाय अज्ञजनांच्या संशय, भावना, इत्यादिनाशक ज्ञान देणारा पंडित आहेस. म्हणून हे पंडितपंडिता, आणि असुरांचा म्हणजे दंभदर्पादिकांचा शत्रु असलेल्या हे प्रभो, ऐहिक आमुष्मिक धनाचा जो राग म्हणजे प्रीती त्याच्या विघातका, सर्व मोक्षमार्गातील अनर्थांना निवारण करणाऱ्या, तो जो ब्रह्मास्वाद आहे, तो प्रत्यक्ष ब्रह्मरूप तूं आहेस.।। द्व्यक्षरी।।६८।।

एवं संस्तुतवतोऽस्य कुष्ठमभवन्नष्टं विशिष्टेष्टसं-

तुष्ट्या तं च सदारमात्मनिकटे तुष्टे ररक्षेष्टकृत्।।

तस्याऽभूत्प्रथिता क्षितौ सुकविता कश्चित्समाकर्ण्य तां

मेने नृस्तुतिमण्डिताऽपि कविता गर्ह्याप्युदारेत्यवित्।।६९।।

अन्वय - **एवं संस्तुवतः अस्य कुष्ठं विशिष्टेष्टसंतुष्ट्या नष्टं अभवत्। इष्टकृत् तं सदारं तुष्टेः आत्मनिकटे ररक्ष तस्य सुकविता क्षितौ प्रथिता अभूत्। कश्चित् तां समाकर्ण्य उदारा अपि कविता नृस्तुतिमंडिता गर्ह्या इति मेने। यतः अवित्।**

अर्थ - याप्रमाणें उत्तमप्रकारें स्तुती करणाऱ्या या ब्राह्मणाचे शिल्लक राहिलेले कुष्ठही भगवंतांच्या संतोषाने नष्ट झाले. अपेक्षित फल देणाऱ्या भगवंताने संतोषाने पत्नीसहित त्या ब्राह्मणाला आपल्याजवळ ठेवून त्याचे रक्षण केले. मग त्याची कवित्वाची प्रसिद्धी झाली. कोणी एक नरकेसरी नांवाच्या कवीने त्याचे कवित्व ऐकून उदार अशा कवित्वाला मनुष्याची स्तुती आहे म्हणूनच निंद्य असे मानले. कारण भगवंताचे तत्त्व त्याला समजले नाही.।। शार्दूलविक्रीडितम्।।६९।।

स नित्यवन्मानसपूजने नवस्वसत्कवित्वं गिरिशेऽर्पयन्निव।।

ददर्श लिङ्गे यतिनं नृकेसरी ततः स तच्छिष्यपदं गतो व्यरिः।।७०।।

अन्वय - **स नित्यवत् गिरिशे मानसपूजने नवस्वसत्कवित्व अर्पयन्निव लिंगे यतिनं ददर्श। ततः व्यरिः स नृकेसरी शिष्यपदं गतः।**

अर्थ - तो नरकेसरी नित्याप्रमाणे कल्लेश्वराला मानसपूजनाच्या वेळी आपण नवीन केलेल्या कवित्वाला अर्पण करतांना लिंगावर बसल्याप्रमाणे असलेल्या भगवान् यतीला पाहता झाला. त्यानंतर अभिमानादिक शत्रू गेलेला असा तो नरकेसरी त्या भगवंतांचा शिष्य झाला.।। वंशस्थम्।।७०।।

एवं विचित्रचरितो विचित्रगुणमण्डितः।

ततान भगवान्भव्यं नव्यं सेव्यं यशो भुवि।।७१।।

अन्वय - **एवं विचित्रचरितः विचित्रगुणमण्डितः भगवान् भव्यं नव्यं सेव्यं यशः भुवि ततान।**

अर्थ - याप्रमाणें विचित्र चरित्रांना करणारा विचित्र गुणांनी अलंकृत असा तो भगवान् क्षेमकर अशी अपूर्व, सेवा करण्यास योग्य कीर्ति भूमंडलांत वाढविता झाला.।। अनुष्टुप्।।७१।।

सप्तर्षय इव सप्त प्रियभक्ता आप्तभक्तयः प्राप्ताः।

आप्तं नेतुं स्वगृहान्दीपावल्युत्सवे तमनुरक्ताः।।७२।।

अन्वय - **सप्तर्षय इव आप्तभक्तयः सप्त प्रियभक्ताः तं अनुरक्ताः दीपावल्युत्सवे स्वगृहान् आप्तं नेतुं प्राप्ताः।**

अर्थ - सप्तर्षींप्रमाणे असलेले भगवद्विषयी भक्ति प्राप्त झालेले सात प्रिय भक्त अतिशय प्रेमाने अनुरक्त असलेले, दीपावलीच्या उत्सवाकरितां आपल्या घराकडे भगवंताला नेण्यासाठी प्राप्त झाले.।। आर्या।।७२।।

मद्गृहं चर मद्गृहं चर मद्गृहं चर मद्गृहं

मद्गृहं चर मद्गृहं चर मद्गृहं त्विति तद्ग्रहम्।।

सोऽवधार्य च तान्निवार्य विचार्य कार्यमथार्य-

वानष्टमूर्तिरुताष्टभक्तहृदिष्टकृत्परिपृष्टवान्।।७३।।

अन्वय - **मद्गृहं चर (सप्तभिः पृथक् पृथक् उक्तं) इति तद्ग्रहं अवधार्य तान् निवार्य कार्यं विचार्य अथ आर्यवान् अष्टभक्तहृदिष्टकृत् अष्टमूर्तिः सन् परिपृष्टवान्।**

अर्थ - माझ्या घराकडे चला, माझ्या घराकडे चला, असें सातहि भक्त म्हणूं लागले. त्या सातहि लोकांचा आग्रह ऐकून कलह दूर करून भक्तांचे मनोरथ पूर्ण करणारा, कार्याचा विचार करून आठहि भक्तांच्या अंतःकरणाप्रमाणें इष्ट फल देणारा तो भगवान् अष्टमूर्ति असा देव विचारता झाला.।। धृतिः।।७३।।

सप्त यूयं त्वहं केवलस्त्वेकलः सप्तगेहेषु चैकक्षणेऽतोऽनलः।।

एष चैकत्र चैकैकगेहं हि वाऽऽनीयतामन्यथा स्याद्व्यथा सा वृथा।।७४।।

अन्वय - **यूयं तु सप्त अहं तु केवल एकलः अतः सप्तगेहेषु एकक्षणे अनलः अतः एषः एकत्र नीयतां अथवा एकैकगृहं नीयताम् अन्यथा सा व्यथा वृथा स्यात्।**

अर्थ - तुम्ही सात आहांत, मी केवळ एकटा आहे. तुम्हां सातहि लोकांच्या घरांत एकाच वेळी एका उत्सवांत राहणें शक्य नाहीं. म्हणून सातहि लोकांनी मिळून एके ठिकाणीं कोठे तरी न्या अगर अनुक्रमाने एकेकाचे घरी न्या, नाही तर व्यर्थ मला त्रास होईल.।। स्रग्विणी।।७४।।

अथापि तेषां निरवद्यमाग्रहं महर्विदित्वा रह आह चैककम्।।

न वाच्यमन्यत्र चरैष्य आलयं तवेत्यगुस्तेऽपि विभुस्तदालयान्।।७५।।

अन्वय - **अथ अपि तेषां निरवद्यं आग्रहं महः विदित्वा एकैकं रहः आहूय आह त्वया अन्यत्र न वाच्यं (त्वं) तवालयं चर (अहं) एष्ये इति ते अगुः विभुः अपि तदालयान् जगाम।**

अर्थः - तथापि त्यांच्या अनिंद्य अशा आग्रहाला ज्योतिस्वरूपी भगवंतानें जाणून एकेकट्याल एकान्तांत बोलावून म्हणाले, तूं कोणालाहि बोलूं नकोस. तूं घराकडे जा. तुझ्या घराकडेच येईन, असे सर्वांना सांगितले. तें ऐकून सगळे आपापले घराकडे गेले. भगवानहि त्यांच्या घराकडे गेले.।। वंशस्थम्।।७५।।

सप्तात्माऽसौ सप्तगेहानि गत्वास्थित्वाऽप्यस्मिन्नेवमेकोऽपि भूत्वा।।

अष्टात्मैवं ते विदुः प्राप्तकामाःकार्तिक्यां तं तुष्टुवुर्नष्टकामाः।।७६।।

अन्वय - **सप्तात्मा असौ अस्मिन् स्थित्वा अपि सप्त गेहानि गत्वा एवं एकः अपि अष्टात्मा भूत्वा भिक्षां जग्राह। प्राप्तकामाः तं कार्तिक्यां मिलिताः संतः विदुः नष्टकामाः संतः तं तुष्टुवुः।**

अर्थ - सात रूपे धारण करून राहणारा भगवान् हा गाणगापुरांत राहूनहि सातहि लोकांच्या घराकडे जाऊन याप्रमाणे आठ रूपे धारण करून भिक्षा घेता झाला. प्राप्तमनोरथ असे ते भक्त कार्तिकी पौर्णिमेच्या दिवशीं जमलेले, भगवंताचे हे स्वरूप समजते झाले. त्यानंतर ते नष्टकाम झालेले भगवंताची स्तुती करते झाले.।। शालिनी।।७६।।

श्रवणाध्ययनार्थप्रतिषेधात् कुर्वन् गुरोस्तु परिचर्याम्।।

वर्यां मर्यादातो वृषलो वृषलोभ्यगाद्गतिं वर्याम्।।७७।।

अन्वय - **श्रवणाध्ययनार्थप्रतिषेधात् मर्यादातः वर्यां गुरोः परिचर्यां कुर्वन् वृषलोभी वृषलः वर्यां गतिं अभ्यगात्।**

अर्थः - शूद्रांना वेद स्मृति इत्यादिकांच्या श्रवणाचा निषेध असल्यामुळे मर्यादेने श्रेष्ठ अशा गुरूंची नमस्कारादिरूप सेवा करणारा, धर्माची अपेक्षा करणारा, कोणी एक शूद्र मुख्य अशा गतीला (मोक्षाला) प्राप्त झाला.।। आर्या।।७७।।

कण्टकाश्माद्यपाकृत्य प्रत्यहं संगमायनम्।

व्यधाद्विशदमाधात्किं स्वात्मनोः संगमायनम्।।७८।।

अन्वय - **कण्टकाश्मादि अपाकृत्य प्रत्यहं संगमायनं विशदं व्यधात् किं तु स्वात्मनोः संगमायनं व्यधात्।**

अर्थ - कांटे, दगड वगैरे प्रतिबंधक वस्तूंना दूर करून रोज संगमाकडचा मार्ग स्वच्छ उत्तम तयार करिता झाला. केवळ संगमाकडचा मार्ग स्वच्छ केला नाही तर या सेवेने जीवात्मा व परमात्मा यांच्या संगमरूप अखंडैकरसरूपी मार्गाला तयार करता झाला.।। अनुष्टुप्।।७८।।

तं चैकदा प्राह गुरुः किमिच्छसि प्रोचे स चेति त्वमनेन गच्छसि।।

सोऽध्वा सुसेव्यो भवदीक्षयाऽभवत्क्षेत्रे फलर्द्धिस्तु तदीक्षको भव।।७९।।

अन्वय - **एकदा गुरुः तं प्राह किं इच्छसि इति स प्रोचे त्वं अनेन अध्वना गच्छसि सः सुसेव्यः अस्तु। भवदीक्षया क्षेत्रे फलर्द्धिः अभवत् तदीक्षकः भव।**

अर्थः - एकदा सद्गुरु त्या शूद्राला म्हणाला, हे शूद्रा, 'तूं काय इच्छितोस?' याप्रमाणे विचारलेला शूद्र म्हणाला :- "हे भगवन्, तूं ज्या मार्गाने जातोस, तो मार्ग तुझ्या सुखाकरितां माझ्याकडून चांगला केला जावा, अशी इच्छा करतों. तुझ्या कृपादृष्टीने शेतांत धान्यसमृद्धि झाली. तूं त्या धान्यसमृद्धीकडे पाहणारा हो. एकदां माझ्या शेताकडे पाहा." - असे म्हणाला.।। इन्द्रवज्रा।।७९।।

तथेति दृष्ट्वा तदजोऽप्यपक्वमुपादिशच्छेत्तुमथाप्यपक्वम्।।

पत्याऽऽच्छिनद्वारित एव पत्न्या चूर्णोपमानीकृतपादधूल्या।।८०।।

अन्वय - **तथा इति अजः अपक्वं अपि तत् दृष्टवा छेत्तुं उपादिशत् अथ एषः पत्या वारितः चूर्णोपमानीकृतपादधूल्या पत्न्या वारितः अपक्वं अपि तत् क्षेत्रं आच्छिनत्।**

अर्थः - 'ठीक आहे,' असे म्हणून भगवंतांनी अपरिपक्व अशा त्या शेताकडे पाहून धान्य कांपण्याविषयी सांगितले. त्यानंतर हा शूद्र शेताच्या मालकांकडून निवारण केला गेलेला व पत्नीच्याकडूनहि पुढे जाऊन कांपण्यास विरोध केला असतांना पाठीमागून जाऊन अपक्व अशा तऱ्हेचे शेतांतील धान्य कांपता झाला.।। उपजातिः।।८०।।

आगच्छन् गुरुरप्यवेक्ष्य तुदितं तं प्राह किं ते कृतम्

नोक्तं सत्यतया मया स च वचः प्रोचे न चेदं मया।।

मौढ्येनापि कृतं त्वया यदुदितं मेऽभीप्सितं तन्मतम्

श्रुत्वा तद्गदितं तथेत्यपि गुरुर्यातो मठं स्वर्चितम्।।८१।।

अन्वय - **गुरुः अपि आगच्छन् तुदितं अवेक्ष्य तं प्राह किं ते कृतं ? मया सत्यतया न उक्तं (इति)स वचः प्रोचे। मया मौढ्येन अपि न कृतं यत् त्वया उक्तं तत् मे अभीप्सितं मतं च एवं तद्गदितं श्रुत्वा तथा इति गुरुः स्वर्चितं मठं यातः।**

अर्थ - गुरूनेहि संगमाकडून जात असतां कांपलेलें क्षेत्र पाहून त्या शूद्राला म्हणाले की, -'हे शूद्रा, तुझ्याकडून हे काम कां केले गेले ? मी कांपून टांक असे खऱ्या अर्थाने सांगितले नव्हते.' ते ऐकून तो शूद्र म्हणाला, - 'मी मूर्खपणाने हे केले नाही. चुकीनेहि केले नाही. जे तुझ्याकडून बोलले गेले ते माझे इष्ट आहे व मान्य आहे.' असें बोललले ऐकून भगवान् "तथास्तु" असे बोलून शिष्यानें उत्तम पूजलेल्या मठाकडे जाते झाले.।। शार्दूलविक्रीडितम्।।८१।।

मूलं यातेंऽशुमालौ जलमुगलमपो मुक्तवान् तेन तत्र

क्षेत्रे छिन्नेऽप्यनेके वरगुरुकृपया त्वङ्कुराः प्रादुरासन्।।

शूद्री दृष्ट्वाऽनुतप्ता तमु शरणमिता सोऽमुयाऽभ्यर्च्य देवम्

धान्यं लेभेऽमितं द्राग्गुरुपदमपि यद्गोत्रमद्यापि धन्यम्।।८२।।

अन्वय - **अंशुमालौ मूलं याते सति जलमुक् अपः अलं मुक्तवान् तेन तत्र क्षेत्रे वरगुरुकृपया अंकुराः प्रादुरासन्। शूद्री दृष्ट्वा अनुतप्ता तं शरणं इता स अमुया सह देवं अभ्यर्च्य अमितं धान्यं लेभे। द्राक् गुरुपदं लेभे ! अद्यापि यद्गोत्रं धन्यम्।**

अर्थ - सूर्य मूळ नक्षत्रावर आला असतां ढगाने खूप पाणी टांकले. त्यामुळे कांपलेले शेतांत श्रेष्ठ गुरुकृपेने अनेक अंकुर उत्पन्न झाले. त्यांना पाहून त्या शूद्राची भार्या अनुताप झालेली त्याच पतीला शरण गेली. तो शूद्र या भार्येसह येऊन भगवंताची पूजा करून अपरिमित धान्य मिळविता झाला, आणि लवकरच मोक्षाला प्राप्त करून घेता झाला. अद्यापि गुरुप्रसादामुळे त्याचें कुल अत्यंत धन्य असे आहे.।। स्रग्धरा।।८२।।

काश्यादिक्षेत्रमुल्लङ्घ्य तस्थावत्राजितः कुतः।
इति पृष्टः स तेनासौ क्षेत्रमाहात्म्यमादिशत्।।८३।।

अन्वय - **काश्यादिक्षेत्रं उल्लंघ्य अजितः अत्र कुतः तस्थौ इति तेन पृष्टः स असौ क्षेत्रमाहात्म्यं आदिशत्।**

अर्थ - भगवान् हा काश्यादि क्षेत्रांना सोडून या गाणगापुरांत कां राहिला ? याप्रमाणें नामधारकाकडून विचारलेला हा सिद्ध क्षेत्रमाहात्म्य सांगता झाला.।। अनुष्टुप्।।८३।।

जालन्धरासुरहतामृतजीवनार्थं शर्वार्पितामृतघटश्च्युत इन्द्रहस्तात्।।
जाता ततोऽप्यमरजेति जगत्प्रतीता कालान्तभीतिदुरितान्तकरी परीता।।८४।।

अन्वय - **जालंधरासुरहतामृतजीवनार्थं शर्वार्पितामृतघटः इंद्रहस्तात् च्युतः ततः कालान्तभीतिदुरितान्तकारी परीता जगत्प्रतीता अमरजा इति जाता।**

अर्थ - जालंधरासुराकडून हत झालेल्या देवांना सजीव करण्याकरितां शंकराने दिलेला अमृतघट इंद्राच्या हातांतून निसटला. त्यापासून कालमृत्यूची भीति आणि पाप यांचा नाश करणारी आणि आजूबाजूंनीं वाहणारी जगांत प्रसिद्ध असलेली अमरजा नदी झाली.।। वसन्ततिलका।।८४।।

गङ्गयाऽर्कतनया यथा तथा भीमयाऽप्यमरजाऽत्र संगता।।
अष्टतीर्थयुतसंगमोऽघहृत्स्यात्प्रयाग इव सर्वकर्महृत्।।८५।।

अन्वय - **यथा गंगया अर्कतनया संगता तथा भीमया अपि अमरजा संगता अष्टतीर्थयुतसंगमः सर्वकर्महृत् अघहृत् प्रयागः इव स्यात्।**

अर्थ - ज्याप्रमाणे गंगेशी यमुना मिळाली, त्याप्रमाणें भीमा नदीस अमरजा नदीहि येथे मिळाली आहे. हा आठतीर्थयुक्त संगम पापहारी व सर्वदुष्कर्म हरण करणारा प्रयागतीर्थाप्रमाणे आहे.।। रथोद्धता।।८५।।

इच्छासंतोषतीर्थे अभिमतफलदे विश्वनाथोऽयमग्रे
जीवन्मुक्तोऽत्र शैवो जड इव विचरन् दर्शयामास काशीम्।।
कल्पद्र्वश्वत्थमूले कलुषहृदिह सा नष्टकुष्ठा स्वसाऽभूद्
रत्नाख्या कोटितीर्थं हरपदिह गया द्वार्वती चक्रतीर्थम्।।८६।।

अन्वय - **अभिमतफलदे इच्छासंतोषतीर्थे स्तः अग्रे अयं विश्वनाथः अत्र जीवन्मुक्तः (कश्चित्) शैवः जड इव विचरन् कल्पद्र्वश्वत्थमूले (बंधुभ्यः) काशीं दर्शयामास। ततः कलुषहृत् अस्ति इह रत्नाख्या स्वसा नष्टकुष्ठा अभूत् ततः कोटितीर्थं ततः हरपत् इह गया अस्ति चक्रतीर्थं द्वार्वती।**

अर्थ - त्यानंतर इच्छातीर्थ आणि त्यापुढे संतोषतीर्थ ही दोन्ही अभिमत फल देणारी आहेत. त्यांच्यापुढे

हा विश्वनाथ आहे. या ठिकाणी एक जीवन्मुक्त शैव खुळ्याप्रमाणें फिरणारा अश्वत्थमूलाजवळ आपल्या बंधूंना काशी दाखविता झाला. त्याच्यापुढे पापविनाशी तीर्थ आहे. या तीर्थांत जी पूर्वी सांगितलेली रत्ना नांवाची बहीण ती नष्टकुष्ट झाली त्याच्यापुढे कोटितीर्थ, त्यांच्यापुढे रुद्रपादतीर्थ हीच गया जाणावी. त्यापुढे असणारे चक्रतीर्थ-ती द्वारका होय. याप्रमाणें आठ तीर्थे समजावीत.।। स्रग्धरा।।८६।।

एवमादीनि तीर्थानि पावनानि प्रकाशयन्।

तस्थाविहैव भगवान्म्लेच्छमुद्धृत्य योगवान्।।८७।।

अन्वय - **एवमादीनि तीर्थानि पावनानि प्रकाशयन् योगवान् भगवान् म्लेच्छं उध्दृत्य इहैव तस्थौ।**

अर्थ - याप्रमाणे पवित्र अशा तीर्थांना प्रकट करून येथेच योगसामर्थ्यसंपन्न भगवान् म्लेंछाचा उद्धार करून राहिले.।। अनुष्टुप्।।८७।।

भगवन् हीनसंभूतः को म्लेच्छः कथमुद्धृतः।

एवं द्विजेन संपृष्टस्तुष्टः स उपदिष्टवान्।।८८।।

अन्वय - **भगवन् हीनसंभूतः म्लेच्छः कः कथं समुद्धृतः एवं द्विजेन संपृष्टः सः तुष्टः उपदिष्टवान्।**

अर्थ - नामधारक ब्राह्मणांकडून- हे भगवन् हीन जातींत उत्पन्न झालेला कोण तो म्लेंछ कसा उद्धरला गेला असे विचारला गेलेला सिद्ध संतुष्ट होऊन सांगता झाला.।। अनुष्टुप्।।८८।।

कृष्णातीरे कुरुपुरे सेवको रजकोऽभवत्।

श्रीपदो विपदो हर्तुर्वरं तस्मै स दत्तवान्।।८९।।

अन्वय - **कृष्णातीरे कुरुपुरे विपदः हर्तुः श्रीपदः रजकः सेवकः अभवत् तस्मै स वरं दत्तवान्।**

अर्थ - कृष्णातीरी कुरवपुरामध्ये आपत्ति दूर करणाऱ्या श्रीपादवल्लभांचा एक परीट सेवक होता. त्याला श्रीपादश्रीवल्लभांनी राज्यप्राप्तीरूप वर दिला.।। अनुष्टुप्।।८९।।

भवान्तरे म्लेच्छकुलेऽभवत्स क्षमापतिः सन्मतिरात्तनीतिः।।

प्राक्संस्कृतिप्राप्तसुरद्विजातिभक्तिर्निजज्ञातिसुशिक्षितोऽपि।।९०।।

अन्वय - **भवान्तरे म्लेच्छस्य कुले सन्मतिः आत्तनीतिः निजज्ञातिसुशिक्षितः अपि प्राक्संस्कृतिप्राप्तसुरद्विजातिभक्तिः क्षमापतिः अभवत्।**

अर्थ - जन्मांतरीं म्लेंछ कुलांत चांगल्या बुद्धीचा आपल्या ज्ञातिबंधूंनी युक्त होऊन त्यांच्याकडून स्वधर्माचे शिक्षण दिले असतांहि पूर्व संस्काराने देवद्विजांच्या बाबतींत अतिशय भक्ती असलेला असा तो म्लेच्छ राजा झाला.।। उपजातिः।।९०।।

वक्त्राद्यैर्देहसाम्येऽपि कथमवयवैर्वर्णभेदो विभेदो

देवत्वं मृच्छिलादौ कथमिति स पतिर्ज्ञातिपृष्टः स्म वक्ति।।

धीमान्द्यं वोऽदयेते गुणचरणभिदा देवसृष्टास्त्वनादि-

र्वेदः सत्यः स्मृतिश्च प्रभुरिह भजतामस्ति सर्वत्र पूर्णः।।९१।।

अन्वय - वक्त्राद्यैः अवयवैः देहसाम्ये अपि विभेदः वर्णभेदः कथं? मृच्छिलादौ देवत्वं कथं ? इति ज्ञातिपृष्टः पतिः वक्ति स्म। वः अदः धीमान्द्यं एते गुणचरणभिदा देवसृष्टाः वेदः अनादिः सत्यः स्मृतिः (सत्या) इह भजतां प्रभुः सर्वत्र पूर्णः अस्ति।

अर्थ - हात पाय तोंड इत्यादि अवयवाने सर्वांच्या देहांत साम्य असतांहि ब्राह्मणादि जातिभेद आणि वर्णभेद कसा आणि माती शिला इत्यादि पदार्थांत देवभाव कसा ? याप्रमाणें स्वज्ञातीकडून विचारलेला

तो राजा म्हणाला की, 'हे जातभाई हो, हें तुमचें बुद्धिमांद्य आहे. कारण हे ब्राह्मणादिक चार वर्ण गुणकर्मविभागाने ईश्वराकडून रचिले गेले आहेत. तत्प्रतिपादक वेद अनादि, अपौरुषेय म्हणून सत्य व स्वतः प्रमाणभूत असा आहे. आणि वेदानुसारी स्मृति ही सत्य आहे. येथें सेवा करणाऱ्यांना सर्वत्र माती, शिला इत्यादिकांत पूर्ण असा प्रभू आहे.।। स्रग्धरा।।९१।।

श्रुतिस्मृती निश्चित ईश्वराज्ञे राज्ञेह नीतिर्विहिता यथाऽऽज्ञा।।

भवेदलंघ्याऽपि तथैव लोके लोकेश्वराज्ञे निहिते किलाऽज्ञे।।९२।।

अन्वय - **श्रुतिस्मृती ईश्वराज्ञे निश्चिते यथा इह राज्ञा नीतिः विहिता सा आज्ञा अलंघ्या भवेत्। तथैव अज्ञे लोके लोकेश्वराज्ञे निहिते एव किल।**

अर्थ - श्रुति स्मृति या ईश्वराच्या आज्ञा निश्चित आहेत. ज्याप्रमाणे इहलोकांत राजांनी केलेली नीति (कायदे) जसे त्या राज्यांत असणाऱ्या लोकांना पाळावे लागतात, तसेच तत्त्वज्ञान नसलेल्या लोकांत श्रुतिस्मृतिरूप देवाच्या आज्ञा अनुल्लंघ्य आहेत.।। उपजातिः।।९२।।

तस्मादस्मानसूयामुखमकदमदः संविहायाऽऽश्रयन्तु

भक्त्येत्यूचे स चेशः स्वयमभजदिमान्भूसुरांस्तत्सुरांश्च।।

तस्याप्येवं सतोऽभूदनिशमसुखदः स्फोटकोऽङ्के स तेन

क्लिष्टोऽनिष्टेन शिष्टक्षितिसुरमवरः पृच्छति स्मास्य शान्तिम्।।९३।।

अन्वय - **तस्मात् अकदं अदः असूयामुखं संविहाय अस्मान् भक्त्या आश्रयंतु इति स च ईशः ऊचे स्वयं अपि भूसुरान् तत्सुरान् च अभजत् एवं सतः अपि तस्य अंके स्फोटकः अभूत् स तेन अनिष्टेन क्लिष्टः अवरः शिष्टक्षितिसुरं अस्य शान्तिं पृच्छति स्म।**

अर्थ - ज्या अर्थी असे आहे त्या अर्थी तुम्ही दुःख देणाऱ्या असूया वगैरे टाकून या ब्राह्मणादिकांच्या भक्तीने आश्रय करा. याप्रमाणे तो राजा बोलला, व आपणहि ब्राह्मणांची आणि त्यांच्या हरिहरादिदेवांची सेवा करता झाला. असे असलेल्या त्याच्या मांडीवर अतिशय दुःख देणारा फोड झाला. त्या अनिष्टकारक विस्फोटकाने अतिशय त्रासलेला यवनराजा शिष्ट अशा ब्राह्मणांना त्या विस्फोटकाच्या उपशमासंबंधी विचारता झाला.।। स्रग्धरा।।९३।।

जनापवादात्स च विप्रवर्यो भीतोऽघहृन्नामकतीर्थदेशे।।

तस्मै रहः प्राह दशार्णराजस्त्रीपुत्रकष्टं त्वृषभप्रसादम्।।९४।।

अन्वय - **जनापवादात् भीतः सः विप्रवर्यः अघहृन्नामकतीर्थदेशे रहः तस्मै दशार्णराजस्त्रीपुत्रकष्टं तु ऋषभप्रसादं च आह।**

अर्थ - तो विचारलेला ब्राह्मण जनपवादामुळे भ्यालेला, पापविनाशी तीर्थप्रदेशांत एकान्ती या राजाला मात्सर्याने सपत्नीने दिलेल्या सर्पगरळामुळे उत्पन्न झालेले दशार्णराजाच्या स्त्रीपुत्रादिकांचे दुःख आणि मृतपत्राचे पुनर्जीवनरूप ऋषभाचा प्रसाद सांगता झाला.।। उपजातिः।।९४।।

मृतस्यापि भद्रायुषो जीवनं तत्समाकर्ण्य स प्राह नाहं हि वेद्मि।।

कुहेदृङ् महासाधुरास्ते नमस्ते समस्तेष्टकृच्छंस मे दीनबन्धो।।९५।।

अन्वय - **तत् मृतस्य अपि भद्रायुषः जीवनं समाकर्ण्य स प्राह। ईदृक् महासाधुः कुह अस्ति? अहं न वेद्मि। ते नमः समस्तेष्टकृत् दीनबंधो तं मे शंस।**

अर्थ - त्या मृत अशा भद्रायूचे पुनर्जीवन ऐकून राजा म्हणाला :- असा महासाधु कोठे आहे ते मला माहीत नाही. हे ब्रह्मन्, तुला नमस्कार असो. हे सर्व अपेक्षा पूर्ण करणाऱ्या दीनबंधो, हे ब्रह्मन्, तो

कोण साधु आहे ते मला सांगा.'।। भुजंगप्रयातम्।।९५।।

स प्राह गन्धर्वपुरेऽस्ति साधुर्म्लेच्छोऽभिपूज्यापि च तं स साधु।।
क्षेत्रं ययौ षड्बलयुक् तरस्वी ददर्श देवं स गुरुं मनस्वी।।९६।।

अन्वय - **स प्राह गंधर्वपुरे साधुः अस्ति सः म्लेच्छः तं साधु अभिपूज्य षड्बलयुक् तरस्वी क्षेत्रं ययौ मनस्वी सः देवं गुरुं ददर्श।**

अर्थः - तो ब्राह्मण त्या राजाला म्हणाला, 'गाणगापुरांत साधु आहेत.' तें ऐकून तो म्लेंच्छ राजा त्या ब्राह्मणाची उत्तमप्रकारे पूजा करून षडंग सैन्य घेऊन त्वरित गतीने गंधर्वपुराला आला. प्रशस्त मनाच्या त्या राजाने देवाचे व गुरूंचे दर्शन घेतले.।। उपजातिः।।९६।।

दृष्ट्वा तं गुरुराह रे रजक किं हृष्टोऽसि मां नागतः
कस्मादित्यवधार्य हृष्टहृदयस्तं प्राह लब्धस्मृतिः।।
स्वामिन्मां रजकं स्वसेवकमकप्राये भवाब्धौ प्रभो
कस्मात्पातयसि प्रियं कमनयं प्रागाचरं वेद्मि नो।।९७।।

अन्वयः - **तं दृष्ट्वा गुरुः आह रे रजक ! त्वं हृष्टोसि किम् ? कस्मात् मां न आगतः ? इति अवधार्य हृष्टहृदयः लब्धस्मृतिः सन् तं प्राह। स्वामिन् ! प्रियं रजकं मां स्वसेवकं अकप्राये भवाब्धौ कस्मात्पातयसि ? प्रभो ! प्राक् कं अनयं आचरं नो वेद्मि।**

अर्थ - त्या म्लेच्छ राजाला पाहून भगवान् गुरु म्हणाले :- 'हे रजका, तूं आनंदांत होतास काय ? तूं इतका काल काय म्हणून माझ्याकडे आला नाहीस ? सांग.' याप्रमाणे भगवद्वाक्य ऐकून हर्षयुक्त अंतःकरणाचा राजा पूर्वीची आठवण झालेला असा भगवंताला म्हणाला :- 'भो स्वामिन्, आपल्या प्रिय सेवकाला (रजकाला) दुःखप्राय भवसागरांत कां म्हणून पाडतां? पूर्वीच्या अन्यायामुळें असें जर म्हणाल तर पूर्वीचा अन्याय तरी काय घडला आहे हे मी जाणत नाही.।। शार्दूलविक्रीडितम्।।९७।।

सती पतिवियोगेन प्राणेश्वर यथा तथा।
भगवन् त्वद्वियोगेन सदा दुःखातुरोऽभवम्।।९८।।

अन्वय - **सती पतिवियोगेन यथा तथा प्राणेश्वर त्वद्वियोगेन सदा दुःखातुरः अभवम्।**

अर्थ - 'हे प्राणेश्वर भगवन्-पतिव्रता स्त्री पतिवियोगाने ज्याप्रमाणें दुःखातुर होते, तद्वत् तुझ्या वियोगाने सदा दुःखातुर झालो आहे.।। अनुष्टुप्।।९८।।

दिष्ट्या स्फोटकदुर्निमित्तत इदं जातं भवद्दर्शनम्
श्रीशः प्राह कुहास्ति दर्शय स तं सन्तं निजाङ्गे स्थितम्।।
नापश्यत्स सुविस्मितोऽथ बहुशस्तं प्रार्थ्य निन्येऽर्थितः
पूर्वं पापविनाशतीर्थमगमत्प्राङ् नागनाथार्चितः।।९९।।

अन्वय - **स्फोटकदुर्निमित्ततः इदं भवद्दर्शनं जातम्। एतत् दिष्ट्या जातम्। श्रीशः प्राह। कुह अस्ति तं दर्शय ? स निजांके स्थितं सन्तं तं न अपश्यत्। सुविस्मितः तं बहुशः प्रार्थ्य स्वराष्ट्रं अर्थितः पूर्वं नागनाथार्चितः पापविनाशितीर्थं अगमत्।**

अर्थ - 'या फोडाच्या दुर्निमित्ताने हे आपलें दर्शन झाले हे माझ्या सुदैवाने फार चांगले झाले.' भगवान् म्हणाले :- 'फोड कोठे आहे मला दाखीव.' तेव्हां तो राजा आपल्या मांडीवर असलेल्याहि फोडाला पाहता झाला नाही. नंतर अत्यंत विस्मित झालेला राजा त्या भगवंताला पुष्कळ प्रार्थना करून

आपल्या राष्ट्राला नेता झाला. त्या राजाकडून प्रार्थना केले गेलेले भगवान् पुढे जाऊन अगोदर सायंदेवाचा मुलगा नागनाथ याचेकडून पूजा घेतलेला व भोजन घेतलेला असा होऊन राजा येण्याचे अगोदर पापविनाशी तीर्थावर आला.।। शार्दूलविक्रीडितम्।।९९।।

राजा स्वैर्निन्दितोऽपि प्रभुमपि पदगः पालकस्थं द्विजेड्यं
नीत्वा वाद्यादिघोषैः पुरमतिमुदितोऽन्तःपुरे भद्रपीठे।।
स्वास्तीर्णे चोपवेश्य स्वविभवमखिलं दर्शयामास तस्मै
दत्त्वाऽजो भक्तिमाप्तः स्वमठमिति जगौ पृच्छते सिद्ध एतत्।।१००।।

अन्वय - **राजा स्वैः निंदितः अपि स्वयं पदगः प्रभुं पालकस्थं द्विजेड्यं वाद्यादिघोषैः पुरं नीत्वा अतिमुदितः अन्तःपुरे स्वास्तीर्णे भद्रपीठे उपवेश्य अखिलं स्वविभवं दर्शयामास। तस्मै अजः भक्तिं दत्त्वा स्वमठं आप्तः इति पृच्छते एतत् सिद्धः जगौ।**

अर्थ - राजा आपल्या ज्ञातिबंधूंकडून निंदित, स्वतः पायाने चालणारा असाहि होऊन पालखींत बसलेल्या, ब्राह्मणांच्याकडून स्तुती केल्या जाणाऱ्या भगवंताला वाद्यादिघोषपूर्वक नगराकडे नेऊन स्वतः अत्यंत आनंदित झालेला अंतःपुरांत आपण स्वतः घातलेल्या सिंहासनावर भगवंताला बसवून आपले सर्व ऐश्वर्य दाखविता झाला. भगवंताने त्या राजाला आपली भक्ती देऊन आपल्या मठाकडे येणे केले. हे विचारणाऱ्या नामधारकाला सिद्धांनी सांगितले.।। स्रग्धरा।।१००।।

सदानन्दति विद्वत्वात्सर्वदाऽति विभुत्वतः।
मृत्युंजयति योगित्वाद्यः स मे हृदि तिष्ठतु।।१०१।।

अन्वय - **यः विद्वत्त्वात् सदानंदति। विभुत्वात् सर्वदा अति योगित्वात् मृत्युंजयति सः मे हृदि तिष्ठतु।**

अर्थ - जो भगवान् ब्रह्मज्ञ असल्यानें सदानंद ब्रह्मदेवाप्रमाणें आहे, सर्वदा व्यापक असल्यामुळें वासुदेवाप्रमाणें आहे आणि योगीपणामुळे मृत्युंजय शंकरासारखा आहे तो भगवान् माझ्या हृदयांत राहो.।। अनुष्टुप्।।१०१।।

वन्देऽहं देवेदेवं धृतिमतिगतिदं साङ्गयोगप्रगम्यं
पारावाराभरागाद्यरिकरिहरिमाह्लादकं दत्तदक्षम्।।
ज्ञेयज्ञं यज्वयज्ञं सुरवरपरदं पारदं रम्यरम्यं
पातारं तारतारं खलबलदलनं श्रीवरं वक्रवक्रम्।।१०२।।

अन्वय - **देवदेवं धृतिमतिगतिदं सांगयोगप्रगम्यं पारावाराभरागाद्यरिकरिहरिं आल्हादकं दत्तदक्षं ज्ञेयज्ञं यज्वयज्ञं सुरवरपरदं पारदं रम्यरम्यं पातारं तारतारं खलबलदलनं श्रीवरं वक्रवक्रं तं देवं अहं वन्दे।**

अर्थ - प्रकाशकत्वामुळें सूर्यादि देवांचा चक्षुरादि इंद्रियांचा देव असा असलेल्या धैर्य, बुद्धि, ज्ञान देणाऱ्या अष्टांग योगानें समजण्यास योग्य असलेल्या समुद्राप्रमाणे दुष्पार व अगाध असलेले जे रागादिक शत्रु आहेत तत्स्वरूपी हत्तींना सिंहाप्रमाणे घातक अशा, भक्तांना आल्हादक अशा, दानदक्ष अशा, ज्ञेय अशा स्वरूपाला जाणणाऱ्या, विधीने याग करणाऱ्यांना यज्ञरूपांत असलेल्या, इंद्रादि देवांना परमपद देणाऱ्या, अतिरम्य अशा आपल्या सेवकांचे रक्षण करणाऱ्या, दुर्जनांचे बल खंडण करणाऱ्या, त्या लक्ष्मीपतीला अथवा मोक्षलक्ष्मीविलासाला, कुटिल लोकांना कुटिल असा असलेल्या अशा भगवंताला मी नमस्कार करतो.।। हारबन्धः।। स्रग्धरा।।१०२।।

वनजतु स तु वनजतु स तु यदि वा सुरवरतु स तु नरवरतु स तु वा।।
निजचरणशरणतरणचरणकृद् य उ महितमहिमयुगिह तमु नुमः।।१०३।।

अन्वय - **सः वनजतु। सः वनजतु। यदि वा सः सुरवरतु। सः नरवरतु वा यः उ निजचरणशरणतरणचरणकृत् महितमहिमयुक् इह लोके वर्तते तं उ नुमः।**

अर्थ - तो भगवान मत्स्यावतार वा कूर्मावतार धारण करो अथवा सुरश्रेष्ठ वामनाचा अवतार धारण करो किंवा राम, कृष्ण, बुद्ध, कलंकी आदि मानवी अवतार धारण करो. पण जो आपल्या चरणांचा आश्रय केलेल्या भक्तांच्या उद्धारांत नेहमी रत असतो आणि जो दिव्य ऐश्वर्यवान् आहे, त्यालाच आम्ही नमस्कार करितो.।।चंद्रावर्ता।।१०३।।

द त्तं यो भ ज ते नि त्यं मुक्ति मे ति न सं श यः।।
वि त्तं यो भ ज ते ऽनि त्यं भु क्ति मे ति न सं श यः।।१०४।।

अन्वय - **यः नित्यं दत्तं भजते सः मुक्तिम् एति। अत्र संशयः न यः अनित्यं वित्तं भजते सः भुक्तिम् एति। अत्र न संशयः।**

अर्थ - जो अविनाशी असलेल्या दत्ताची उपासना करतो, तो मोक्षाप्रत पावतो. आणि जो विनाशी असलेल्या द्रव्याची सेवा करतो म्हणजेच जन्मभर जो द्रव्य मिळविण्यासाठींच धडपडत असतो, तो ह्या जन्ममरणरूप संसाराच्या फे-यांत सांपडतो. ह्याविषयी अणुमात्र संशय नाही.।। गोमूत्रिकाबन्धः।।१०४।।

।।सर्वतोभद्रः।।

सा का र ता। ता र का सा। का ऽ पि सा र। र सा पि का।।
र सा य मे-। ऽ मे य सा र। ता र मे य। य मे र ता।।१०५।।

अन्वय - **हे अमेय ! सारतारमेय ! तारका साररसापिका सा का अपि साकारता मे रसाय यमे रता भवतु।**

अर्थ - हे भगवन्, तूं प्रत्यक्षादि प्रमाणांनी जरी अगम्य आहेस तथापि वेदांचा सारभूत जो ओंकार (प्रणव) त्याच्या उपासनेनें तुझें ज्ञान होऊं शकतें. हे ईश्वरा, दत्तात्रेया, तुझी ती द्विभुज षड्भुज चतुर्भुज आदि वेदपुराणांमध्यें प्रसिद्ध असलेलीं आणि सर्वसारभूत भक्ताला आनन्द देणारी, त्याचप्रमाणे भक्ताला भवसागरापासून तारणारी तुझी सर्व सगुणरूपे मला परमानन्द देवोत.।।मुरजबन्धः।।

अ व रं श्री व रं वं दे ऽ।। श्री व रं श्री क रं व दे।।
दे व रं श्री ध रं सं तं।। नृ व रं श्री प रं स तं।।१०६।।

अन्वयः - **अश्रीवर देवरं सन्तं सतं नृवरं श्रीपरं अवरं श्रीवरं श्रीकरं श्रीधरं वन्दे वदे च।**

अर्थ - अज्ञान दूर करणा-या, देवांना, स्वपदाची प्राप्ति करून देणा-या-अथवा-इन्द्रादि देवांनासुद्धां ज्याची भीति वाटते अशा, ब्रह्मरूप असणा-या अथवा-तीनहि कालांमध्यें-अबाधित आणि पूजनीय किंवा भक्ताच्या कामक्रोधादि विकारांचा नाश करणा-या अशा, श्रीपादश्रीवल्लभश्रीनृसिंहसरस्वतीरूपाने अवतार धारण करणा-या- असे असूनहि वेदांनासुद्धां ज्याचे यथार्थ स्वरूप कळत नाही-अशा, म्हणूनच ज्यापेक्षां कांहीं दुसरें श्रेष्ठ नाहीं, अर्थात्-श्रेष्ठतेची परमावधि असलेल्या सरस्वतीचा पति ब्रह्मा, लक्ष्मीचा स्त्री म्हणून स्वीकार करणारा-विष्णु, व हालाहल विषाची शोभा धारण करणारा शंकर-अशा ब्रह्मा-विष्णु-महेशस्वरूप असणा-या भगवान् दत्तात्रेयाला मी नमस्कार करतो, व त्याची स्तुतीहि करतो.।। सर्वतोभद्रः।।१०६।।

(पं.श्रीपादशास्त्री तापस यांची टीका)

अवरं श्रीवरं वन्देऽश्रीवरं श्रीकरं वन्दे। देवरं श्रीधरं सन्तं नृवरं श्रीपरं सतम्।।

(अश्रियम् अज्ञानं वरति वारयतीति **अश्रीवरः** तम्। '*अहमज्ञानजं तमः। नाशयामि*' इति स्मृतेः। '*वृञ् आवरणे*' इति चुरादिषु आधृषीयेषु पठ्यते। देवेभ्यो निजपदं रातीति (ददातीति) **देवरः** तम्। '-भगवता स्वपदं प्रवेशिता देवता अद्यापि तं भगवन्तं भजन्ते' इति श्रीदत्तचम्पूक्तेः। 'चतुर्थी' इति योगविभागात्समासः। अथवा देवानामिन्द्रादीनामपि रः रलयोरभेदात् लः भयस्वरूपः तम्। '*भीषास्माद्वातः पवते। भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च-*' इत्यादिश्रुतेः। '*-लश्च भूमौ भये चाल्हादनेऽपि च*' इत्येकाक्षरात्। **सन्तं** ब्रह्मज्ञस्वरूपम्। '*अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुः-*' इति श्रुतेः यद्वा **सन्तं** त्रिकालाबाध्यम् पूज्यं वा। '*सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्*' इत्यमरः। '*सः कोपे वरणे-*' इत्येकाक्षरकोशात् '*स*' पदार्थः क्रोधः। उपलक्षणात्कामादयोऽपि। तेषां '*तः*' चोरः तम। भक्तकामक्रोधादिनाशकमित्यर्थः। '*तावद्रागादयः ....यावत्कृष्ण न ते जनाः*' इति श्रीमद्भागवतात्। '*तकारः कीर्तितश्चोरे*' इत्येकाक्षरकोशः। **नृवरं** पुरुषश्रेष्ठम्। श्रीपादश्रीवल्लभनरसिंहसरस्वत्यादिपुण्यपुरुषरूपेणावतीर्णमित्यर्थः। एवं यथाशक्तिवर्णनेऽपि वस्तुतः **श्रीपरं** श्रिया वेदत्रय्या अपि परं परतो वर्तमानम्। तस्या अगोचरमित्यर्थः '*ऋचो यजूँषि सामानि। सा हि श्रीरमृता सताम्*' इति, '*अथात आदेशो नेति नेति*' इति, '*यतो वाचो निवर्तन्ते*' इति च श्रुतिभ्यः। अत एव **अवरं** नास्ति वरः श्रेष्ठो यस्मात्सः अवरः तम्। श्रेष्ठतायाः परमावधिभूतामित्यर्थः। '*नत्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः ?*' इति स्मृतेः। ईदृशं, '**श्रीवरं श्रीकरं श्रीधरं**' ब्रह्माविष्णुमहेशात्मकं दत्तं वन्दे नमस्कारोमि। श्रियाः सरस्वत्या वरो वल्लभो ब्रह्मा। श्रियं करोति लक्ष्मीं पत्नीत्वेन स्वीकरोतीति श्रीकरो विष्णुः। (भक्तेभ्योऽविलम्बेन दानाय) श्रीः करेषु यस्य स इति वा। '*अनन्तहस्तैः कमलावरेण दत्तं किमादत्त करद्वयेन*' इत्याभियुक्तोक्तेः। श्रियं हालाहलविषशोभां (कण्ठे) धरतीति श्रीधरो महेश्वरः। (तमेव दत्तं) **वन्दे** स्तौमि च। चुरादेर्वदधातोराधृषीयत्वाण्णिजभावपक्षे रूपमिदम्। '**सतम्**' इत्यत्र '**सः तम्**' इति पदद्वयं वा। तं प्रसिद्धम्। सः तत्स्वरूपी (दत्तस्वरूपी) अहं वन्दे इति 'अहं' पदमध्याहृत्य योजना। '*ब्रह्मविद्ब्रह्मैव भवति*' इति श्रुतेः। '*दासोऽहमिति या बुद्धिः पूर्वमासीज्जनार्दने। 'दा' कारोऽपहृतस्तेन गोपीवस्त्रापहारिणा।।*' इति अभियुक्तोक्तेश्चेत्यलं विस्तरेण।।)

दासपं गतिदं वन्देऽत्रिजं चारुहितं वृतम्।
तं वृतं हि रुचाऽजं त्रिदेवं दन्तिगपं सदा।।१०७।।

अन्वय - **दासपं गतिदं, चारुहितं भक्तैः प्रेम्णा वृत् रुचा वृतं दन्तिगपं त्रिदेवम् अजम् अपि अत्रिजम् अहं सदा वन्दे।**

अर्थ - भक्तांचें पालन करणारा, भक्तांना मुक्ति देणारा, मोक्षामध्ये पर्यवसान पावणारे हित करणारा, भक्तांनी प्रेमपाशांनी बांधलेला, व ज्याच्याभोंवती दिव्य तेजोवलय आहे, आणि ज्याने सहस्रार्जुनादि राजांचे पालन केले, त्या भूलोक, भुवर्लोक व स्वर्गलोक या तिन्ही लोकांना प्रकाश देणाऱ्या अजन्मा असूनसुद्धां भक्तानुग्रहासाठी अत्रिऋषीपासून झालेल्या दत्तात्रेयाला मी प्रणाम करितो.।। गतप्रत्यागतम्।।१०७।।

वस्वश्विनागभूतुल्ये(१८२८) शालिवाहशके कृता।। मार्गशीर्षे सिते पक्षे टीकैषास्तु गुरोर्मुदे।।१।।
कारनाटकदेशे तु श्रीगुर्ल्हासुरसंज्ञके।। ग्रामे मलापहातीरे टीकेयं पूर्णतां गता।।२।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्वासुदेवानन्दसरस्वतीविरचितं
श्रीगुरुचरित्रकाव्यं(त्रिशती)संपूर्णम्।।

ॐ तत्सत् ब्रह्मार्पणमस्तु।।

आपल्या राष्ट्राला नेता झाला. त्या राजाकडून प्रार्थना केले गेलेले भगवान् पुढे जाऊन अगोदर सायंदेवाचा मुलगा नागनाथ याचेकडून पूजा घेतलेला व भोजन घेतलेला असा होऊन राजा येण्याचे अगोदर पापविनाशी तीर्थावर आला.।। शार्दूलविक्रीडितम्।।९९।।

राजा स्वैर्निन्दितोऽपि प्रभुमपि पदगः पालकस्थं द्विजेड्यं
नीत्वा वाद्यादिघोषैः पुरमतिमुदितोऽन्तःपुरे भद्रपीठे।।
स्वास्तीर्णे चोपवेश्य स्वविभवमखिलं दर्शयामास तस्मै
दत्त्वाऽजो भक्तिमाप्तः स्वमठमिति जगौ पृच्छते सिद्ध एतत्।।१००।।

अन्वय - **राजा स्वैः निंदितः अपि स्वयं पदगः प्रभुं पालकस्थं द्विजेड्यं वाद्यादिघोषैः पुरं नीत्वा अतिमुदितः अन्तःपुरे स्वास्तीर्णे भद्रपीठे उपवेश्य अखिलं स्वविभवं दर्शयामास। तस्मै अजः भक्तिं दत्त्वा स्वमठं आप्तः इति पृच्छते एतत् सिद्धः जगौ।**

अर्थ - राजा आपल्या ज्ञातिबंधूंकडून निंदित, स्वतः पायाने चालणारा असाहि होऊन पालखींत बसलेल्या, ब्राह्मणांच्याकडून स्तुती केल्या जाणाऱ्या भगवंताला वाद्यादिघोषपूर्वक नगराकडे नेऊन स्वतः अत्यंत आनंदित झालेला अंतःपुरांत आपण स्वतः घातलेल्या सिंहासनावर भगवंताला बसवून आपले सर्व ऐश्वर्य दाखविता झाला. भगवंताने त्या राजाला आपली भक्ती देऊन आपल्या मठाकडे येणे केले. हे विचारणाऱ्या नामधारकाला सिद्धांनी सांगितले.।। स्रग्धरा।।१००।।

सदानन्दति विद्वत्वात्सर्वदाऽति विभुत्वतः।
मृत्युंजयति योगित्वाद्यः स मे हृदि तिष्ठतु।।१०१।।

अन्वय - **यः विद्वत्त्वात् सदानंदति। विभुत्वात् सर्वदा अति योगित्वात् मृत्युंजयति सः मे हृदि तिष्ठतु।**

अर्थ - जो भगवान् ब्रह्मज्ञ असल्यानें सदानंद ब्रह्मदेवाप्रमाणें आहे, सर्वदा व्यापक असल्यामुळें वासुदेवाप्रमाणें आहे आणि योगीपणामुळे मृत्युंजय शंकरासारखा आहे तो भगवान् माझ्या हृदयांत राहो.।। अनुष्टुप्।।१०१।।

वन्देऽहं देवेदेवं धृतिमतिगतिदं साङ्गयोगप्रगम्यं
पारावाराभरागाद्यरिकरिहरिमाह्लादकं दत्तदक्षम्।।
ज्ञेयज्ञं यज्वयज्ञं सुरवरपरदं पारदं रम्यरम्यं
पातारं तारतारं खलबलदलनं श्रीवरं वक्रवक्रम्।।१०२।।

अन्वय - **देवदेवं धृतिमतिगतिदं सांगयोगप्रगम्यं पारावाराभरागाद्यरिकरिहरिं आल्हादकं दत्तदक्षं ज्ञेयज्ञं यज्वयज्ञं सुरवरपरदं पारदं रम्यरम्यं पातारं तारतारं खलबलदलनं श्रीवरं वक्रवक्रं तं देवं अहं वन्दे।**

अर्थ - प्रकाशकत्वामुळें सूर्यादि देवांचा चक्षुरादि इंद्रियांचा देव असा असलेल्या धैर्य, बुद्धि, ज्ञान देणाऱ्या अष्टांग योगानें समजण्यास योग्य असलेल्या समुद्राप्रमाणे दुष्पार व अगाध असलेले जे रागादिक शत्रु आहेत तत्स्वरूपी हत्तींना सिंहाप्रमाणे घातक अशा, भक्तांना आल्हादक अशा, दानदक्ष अशा, ज्ञेय अशा स्वरूपाला जाणणाऱ्या, विधीने याग करणाऱ्यांना यज्ञरूपांत असलेल्या, इंद्रादि देवांना परमपद देणाऱ्या, अतिरम्य अशा आपल्या सेवकांचे रक्षण करणाऱ्या, दुर्जनांचे बल खंडण करणाऱ्या, त्या लक्ष्मीपतीला अथवा मोक्षलक्ष्मीविलासाला, कुटिल लोकांना कुटिल असा असलेल्या अशा भगवंताला मी नमस्कार करतो.।। हारबन्धः।। स्रग्धरा।।१०२।।